श्री शनिबाधा विमोचन शबरीश्वराष्टकं

शनिबाधाविनाशाय घोरसंतापहारिणे ।
कानकालयवासाय भूतनाथाय ते नमः ॥1॥

दारिद्र्यजातान्रोगऽतीन्बुद्धिमांद्यादि संकटान् ।
क्षिप्रं नाशाय हे देवा शनिबाधाविनाशक ॥2॥

भूतबाधामहा दुःखमध्यवर्तिनमीशमां ।
पालय त्वं महाबाहो सर्वदुःखविनाशक ॥3॥

अवाच्यानि महादुःखान्यमेयानि निरंतरं ।
संभवंति दुरंतानि तानि नाशय मे प्रभो ॥4॥

मायामोहान्यनंतानि सर्वाणि करुणाकर ।
दूरीकुरु सदा भक्तहृदयानंददायक ॥5॥

अनेकजन्म संभूतांतापपापान्गुहेश्वर ।
चूर्णीकुरु कृपासिंधोसिंधुजाकांत संतते ॥6॥

उन्मत्तोत्भूत संतापकान् कृपान् महेश्वर ।
हस्तावलंबं दत्वं मां रक्ष रक्ष शनैश्चर ॥7॥

देहि मे बुद्धिवैशिष्ट्यं देहि मे नित्ययौवनं ।
देहि मे परमानंदं देव देव जगत्पते ॥8॥

इति श्रीशनिबाधा विमोचन शबरीश्वराष्टकं संपूर्णं ।